9

1075CH09

# अव्ययानि

**1. अधोलिखितानि वाक्यानि पठत—**

- दुर्वहम् अत्र जीवितम्।
- प्रकृति: एव शरणम्।
- स: सदा सत्यं वदति।
- यानानां पङ्क्तयो हि अनन्ता:।
- वायुयानं भृशं दूषितम्।
- जलं निर्मलं न अस्ति।
- एतत् खलु राजासनम् अस्ति।
- अलम् अतिशालीनतया।
- ननु भगवान् वाल्मीकि: अयम्।

उपरि यानि रेखाङ्कितानि पदानि सन्ति तानि सर्वाणि अव्ययपदानि सन्ति। अव्ययपदानि लिङ्गवचनविभक्तिषु न परिवर्तन्ते। तद्यथा —

(क) i. बाल: अपि धावति। ii. बालिका अपि धावति।

अत्र लिङ्गकारणात् अपि परिवर्तनं न भवति।

(ख) i. यदा स: आगच्छति तदा ते गच्छन्ति। ii. यदा ते आगच्छन्ति तदा वयं गच्छाम:।

अत्र वचनकारणात् अपि 'यदा-तदा' अव्यययो: परिवर्तनं न भवति।

(ग) i. बाल: उच्चै: वदति। ii. पिता बालम् उच्चै: वदति।

अत्र विभक्तिकारणाद् अपि 'उच्चै:' इति अव्ययपदे परिवर्तनं न भवति।

अत:—

सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु।
वचनेषु च सर्वेषु यन्न व्येति तदव्ययम्॥

- अव्ययानि न परिवर्तन्ते।
- अव्ययानि त्रिषु लिङ्गेषु सदृशानि भवन्ति।
- अव्ययानि त्रिषु वचनेषु सदृशानि भवन्ति।
- अव्ययानि सर्वासु विभक्तिषु सदृशानि भवन्ति।

© NCERT not to be republished

## अव्ययपदानि

| कालवाचकानि | स्थानवाचकानि | युग्मानि | समानार्थकानि | विकीर्णानि |
|---|---|---|---|---|
| पुरा- प्राचीनकाल में | यत्र- जहाँ | यावत्-तावत् = जब तब | ननु, नूनम्, खलु — निश्चय | अपि-भी |
| सद्यः- तुरन्त | तत्र- वहाँ | यत्र-तत्र= जहाँ वहाँ | सम्प्रति, अधुना, इदानीम्, साम्प्रतम् — अब | वृथा-बेकार |
| सपदि- तुरन्त | उपरि- ऊपर | शनैः-शनैः= धीरे-धीरे | सदा | अथ किम्- हाँ और क्या |
| अचिरात्- अभी | कुत्र- कहाँ | यदा = जब | सर्वदा | च- और |
| अचिरेण- अभी | अत्र- यहाँ | तदा = तब | इत्थम्- इस प्रकार से | अपरम्- और भी |
| सततम्- निरन्तर | सर्वत्र- सब जगह | कदा = कब | एवम्- इस प्रकार | सत्वरम्- शीघ्र |
| अभितः- दोनो ओर | नीचैः- नीचे | यदि तर्हि= यदि तो | | अन्यथा- दूसरे प्रकार से |
| परितः- चारो ओर | | मुहुर्मुहुः= बार-बार | | सर्वथा- सब प्रकार से |
| उभयतः- दोनो ओर | | यथा-तथा= जैसा वैसा | | एव- ही |
| सर्वतः- सब ओर | | यथापि तथापि= जैसे भी वैसे भी | | प्रति- ओर |
| कदाचित्- कभी, किसी समय | | | | अलम्- बस, समर्थ |
| अचिरम्- अभी | | | | च- और |
| एकदा- एक बार | | | | न- नहीं |
| सकृत्- एक बार | | | | मा- मत |
| सहसा- अचानक | | | | अतः- इसलिए |
| सदा- हमेशा | | | | इति- इस प्रकार |
| इतस्ततः- इधर-उधर | | | | उच्चैः- ज़ोर से |
| कुतः- कहाँ से | | | | पुनः- फिर |
| नक्तम्- रात | | | | तूष्णीम्- चुपचाप |
| दिवा- दिन | | | | तु- तो |
| अद्य- आज | | | | परम्- परन्तु |
| ह्यः- बीता हुआ कल | | | | कथम्-कैसे |
| श्वः- आने वाला कल | | | | अनृतम्- झूठ |
| वृथा- व्यर्थ | | | | ततः- तत्पश्चात् |
| समीपे- पास में | | | | परस्परम्-आपस में |
| दूरे - दूर | | | | इव- के समान |

© NCERT not to be republished

## अभ्यास:

**1. अधोलिखितानि वाक्यानि पठित्वा अव्ययपदानि चित्वा लिखत—**

**अव्ययपदानि**

(i) एकदा तस्य भार्या पितुर्गृहं प्रति चलिता। – ..........

(ii) भवान् कुत: भयात् पलायित:। – ..........

(iii) तत्र गम्यताम्। – ..........

(iv) त्वं सत्वरं चल। – ..........

(v) तेन सदृशं न अस्ति। – ..........

(vi) गीता सुगीता च वदत:। – ..........

(vii) यदा स: पठति तदा एव शोभते। – ..........

(viii) तापसौ लवकुशौ तत: प्रविशत:। – ..........

(ix) अलम् अतिदाक्षिण्येन। – ..........

(x) अहम् अपि श्रावयामि। – ..........

**2. उचिताव्ययपदै: रिक्तस्थानानि पूरयत—**

**मञ्जूषा**

| |
|---|
| सर्वत्र, एव, इति, ननु, एवम्, तत्र, उच्चै:, तथापि, बहुधा, मा |

(i) मम गुरु: .......... भगवान् वाल्मीकि:।

(ii) क: .......... भणति?

(iii) कुपिता सा .......... वदति।

(iv) त्वं .......... गच्छ।

(v) यूयं चापलं .......... कुरुत।

(vi) कृषीवल: बहुवारं प्रयत्नमकरोत् .......... वृष: नोत्थित:।

(vii) कृषक: बलीवर्दं .......... पीडयति।

(viii) बहूनि अपत्यानि मे सन्ति .......... सत्यम्।

(ix) सर्वेषु अपत्येषु जननी तुल्यवत्सला .......... ।

(x) .......... जलोपप्लव: सञ्जात:।



© NCERT not to be republished

3. **विपर्ययाव्ययपदैः सह योजयत—**

| | |
|---|---|
| यत्र .................. | यथा .................. |
| यथैव ................. | यदा .................. |
| यदैव .................. | यावत् ................ |
| अत्र.................. | यदि .................. |

4. **उचितार्थैः सह मेलनं कुरुत—**

| | | |
|---|---|---|
| (i) | पुरा | नहीं/मत |
| (ii) | उच्चैः | हमेशा |
| (iii) | नूनम् | परंतु |
| (iv) | इत्थम् | ही |
| (v) | सर्वथा | इस प्रकार |
| (vi) | एवम् | सब प्रकार से |
| (vii) | एव | इस प्रकार से |
| (viii) | परम् | निश्चय |
| (ix) | सदा | ज़ोर से |
| (x) | मा | प्राचीनकाल में |



© NCERT not to be republished

**5. उचिताव्ययपदैः सह रिक्तस्थानानि पूरयत —**

**मञ्जूषा**

| |
|---|
| यथा-तथा, यदि-तर्हि, यथैव-तथैव, यावत्-तावत्, यत्र-तत्र। |

(i) .................................. लवः .................................. कुशः।

(ii) .................................. अहं कृष्णवर्णः ..................................त्वं किं गौराङ्गः!

(iii) .................................. गुरुः वदति .................................. शिष्यः करोति।

(iv) .................................. वृक्षाः .................................. खगाः।

(v) .................................. लता आगच्छति .................................. त्वं तिष्ठ।

**6. उदाहरणानुसारं लिखत —**

(i) श्वः सोमवासरः..................................

(ii) ..................................

(iii) ..................................

(iv) ..................................

(v) ..................................




**7. पर्यायाव्ययपदानि लिखत —**

ननु
.................... ....................

सम्प्रति
.................... ....................